End. ओं अस्यांरात्रौकृतैतच्चतुर्थीकर्मप्रतिष्ठार्थं गामेकां रुद्रदैवतां यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे इतिकर्मदक्षिणान्दद्यात ॥ * ॥

Colophon. इतिचतुर्थीकर्मसमाप्तम् । श्रीरस्तु शुभमस्तु ॥ * ॥ श्रीगोपालायनमः ॥ * आश्विनकृष्णसप्तम्यां शनिः ॥ सन १२७१ साल ॥

विषयः । विवाहपद्धतिर्वाजसनेयिनाम् ।

A. वाजसनेयिविवाहपद्धतिः By रामदत्त ।

Vājasaneyivivāhapaddhatiḥ.

Substance:—Character Maithilī. Brown paper. Lines 10 on a page. Letters 34 in a line. Folia 47. 10×4 inches. Appearance, old. Prose. Complete, Correct. Date (?) Worn-out. Soiled. Place of deposit, Pandit Rabīnath Jhā, Professor, M. R. Vidyālaya, and resident of Andhraṭhārhī P. O., Darbhanga. A manual of Daśakarmapaddhati of Vājasaneyī Brāhmaṇas, according to Yajur Veda by Rāmadatta.

Beginning, End, Colophon, विषयः—Same.

No. 319. वादसारसमुच्चयः By अमृतनाथ।
Vādasārasamuchchayaḥ.

Substance:—Character Maithilī. Brown paper. Lines 11 on a page. Letters 40 in a line. Folia 46. 12¼×4½ inches. Appearance, fairly old. Complete. Correct. Date Śaka 1768. Place of deposit, Pandit Gokulanāth Jhā, Nanaur, Tamuriā P. O., Darbhanga; now in possession of Jayadeva Ṭhākur, brother-in-law of the owner of the Ms. A hand-book of Dharmaśāstra, dealing with the subjects, enumerated at the beginning by Amṛtanāth Jhā.

Beginning. श्रीगणेशाय नमः ॥

पिता पञ्चाननो यस्य भ्राता चापि षडाननः ।
स्वयं गजाननो विघ्ननाशायास्तु विनायकः ॥
श्रीमन्मानिकशर्मणः सुकृतिनः सच्छाब्दिकस्याखिले ।
साहित्य निपुणस्य यो हि तनयोज्येष्ठस्तुसत्तार्किकः ॥
साहित्येस्मृतिकोषतन्त्रकुशलः ख्यातोऽवनौधार्मिक-
स्तेनैव क्रियते विवादविषये कश्चित्प्रवन्धोयमः ॥
श्रीमताऽमृतनाथेन वादसारसमुच्चयः ।
क्रियते वालवोधाय तत्रास्तुशरणं शिवा ॥
तत्रकतिपयविवादपदेषु निरूपणीयेषु,
तेषामाद्यमृणादानं निःक्षेपोस्वामिविक्रयः ।
संभूय च समुत्थानं दत्तस्यानपकर्म च ॥
वेतनस्यैव चादानं सम्विदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयोविवादः स्वामिपालयोः ॥
सीमाविवादधर्मश्च पारुष्येदण्डवाचिके ।
स्तेयञ्च साहसञ्चैव स्त्रीसंग्रहणमेवच ॥
स्त्रीपुंधर्मोविभागश्च द्यूतमाह्वयमेव च ।
पदान्यष्टादशैतानि व्यवहारस्थिताविहेति ॥

End. अध्यात्मरामायणे नवमाध्याये भरतवाक्यम्,
राम राम महाभाग स्वात्मानमभिषेचय ॥

राज्यं पालय पौत्र्यंन्तेज्येष्ठस्त्वं मे पिता यथा ॥ * ॥

Colophon. इतिवढिग्रामववौलीवंशोद्भवमहोपाध्याय श्रीअमृतनाथशर्मकृतसारसमुच्चयार्णवे व्यवसार-समुच्चयः समाप्तः ॥ समाप्तश्चायंग्रन्थः ॥ * ॥ शाके १७६८ कार्तिकशुक्लाष्टम्यां कुश-सकुरीसरिसवसंश्रीभैयाशर्माऽलिखत् ॥ शुभमस्तु ॥ श्रीरस्तु ॥ सिद्धिरस्तु ॥

विषयः । ऋणादानादिविवादविषयः ।

No. 320. **वापीकूपतडागादिवास्तुविधिः ।**

Vāpīkūpataḍāgādivāstuvidhiḥ.

Substance:—Character Maithilī. Palm leaves. Lines 5 on a page. Letters 56 in a line. Folia 21. 11×2½ inches. Prose. Appearance, old. Complete. Correct. Date (?). Place of deposit, Pandit Bachchā Jhā, Hanumān Nagar, Lohāt P. O., Darbhanga. A hand-book of Karmakāṇḍa dealing with "**वापीकूपतडागवास्तु**". Worn-out. Soiled and torn.

Beginning. ओं नमो महागणेशाय ॥

अथ तडागादिवास्तुविधिः । तत्र तडागादिवास्तुदिने चतुर्दलां भूमिं अवच्छिद्य तडागादिकरणायेयंभूमिरितिमनसापरिगृह्य धरं धरां वास्तुपुरुषञ्चावाह्य गन्धादिभिः पञ्चोपचारैः पूजयेत । पूजाचेयं समाचाराद्यात्रौकर्तव्या ॥

End. ओं अद्यकृतैतदमुकवास्तुप्रतिष्ठार्थममुंसुवर्णममिदैवतं एतास्तिस्रोगारुद्रदैवता एतद्वासो युगं बृहस्पतिदैवतं अमुकगोत्रायामुकशर्मणेब्राह्मणायगुरवेदक्षिणां तुभ्यमहं संप्रददे ॥ इति दक्षिणान्दद्यात् । ओंस्वस्तीतिगुरुराह ॥ ततो ब्राह्मणेभ्योगान्दत्वास्वस्तिवाचनि कान्यरितोष्य देवस्थपतिवैष्णवपूजाब्राह्मणतर्पणं गृह्यागतभोजनञ्चकारयेत् ॥इति

Colophon. इतिवापीकूपतडागादिवास्तुविधिः समाप्तः ॥ श्री जगन्नाथस्य ॥

विषयः । वापीकूपतडागवास्तुपद्धतिः ।

No. 321. **वाशिष्ठहोमपद्धतिः ।** Vāśiṣṭhahomapaddhatiḥ.

Substance:—Character Devanāgarī. White paper. Lines 7 on a page. Letters 28 in a line. Folia 106. 9½×4 inches. Appearance, fairly old. Prose and hymns. Complete.

Incorrect, Date (?). Place of deposit, Pandit Balabhadra Jhā, Pachaḍhī, Pandaul P. O., Darbhanga. A mannual of Karmakāṇḍa, dealing with the Homa of Navagrahas.

Beginning. श्रीगणेशाय नमः ।

भास्वान्काश्यपगोत्रजोऽरुणरुचिर्यः सिंहराशीश्वरः ।
षट्त्रिस्थोदशशोभनो गुरुशशीभौमेषु मित्रं सदा ॥
शुक्रोमंदरिपुः कलिङ्गजनितश्चाग्नीश्वरौ देवते ।
मध्येवर्तुलपूर्वदिग्मदिनकरः कुर्यात्सनोमंगलम् ॥ १ ॥
चन्द्रः कर्कटकः प्रभुः सितनिभश्चात्रेयगोत्रोद्भव ।
श्चाग्नेय्यांचतुरस्रवारुणमुखश्चापोहिमानीश्वरः ॥
षट्सप्ताग्निदशैकशोभनफलो नोरिर्बुधार्कप्रियः ।
स्वामीयामुनदेशजो हिमकरः कुर्यात्सनो मंगलम् ॥ २ ॥

End. आदित्यश्च श्रियंदद्याद्दीर्घायुश्चन्द्रमास्तथा ।
श्रियंमंगलकोदद्याद्बुधोवुद्धिप्रदस्तथा ॥
वृहस्पतिस्तथामेधां प्रदद्याद्भार्गवः शुभं ।
गृहे वा यदि वा रण्ये जलेवायदिवा स्थले ॥
राजद्वारे स्थितस्यापि शुभंदद्याच्छनैश्चरः ।
रक्षन्तुराहवो नित्यं तवदेहान्यशेषतः ॥
रक्षेयुः केतवो नित्यमधिदेवास्तथैव च ॥
तथा प्रत्यधिदेवाश्च दिक्पालाश्च महावलाः ।
गणनाथो ददात्विष्टं पुनन्तुवसवस्तथा ॥
राज्यं ददतुरुद्राश्च आदित्या संकटजयं ।
विश्वेदेवा सदोत्साहं कुर्वन्तुचदिनेदिने ॥
कुर्वन्तु ऋषयः सर्वे त्वायुरारोग्यसंपदः ।
रत्नं समुद्रा यच्छन्तु शास्त्राणि निजशक्तितः ।
नागा वुद्धंविघ्नंतु पितरोमुक्तिदायकाः ।
ददात्वागस्त्यःकल्याणं भवः संतानमेवच ॥
रूपं चाश्वलंप्रज्ञायशः कामानवाप्नुयात् ।
ऋद्धिः सिद्धिः श्रियंचैव आरोग्यं भास्करादयः ॥

अनेनैवप्रकारेण आशीर्वयात्प्रयत्नतः ।

संतुष्ट्यै सर्वदेवानां ग्रहहोमंचकारयेत् ॥ इति आशीर्वादः ॥

Colophon. इतिसुबोधिनीहोमपद्धतिसमाप्ता ॥ जयशिव ओंकाराः ॥

विषयः । नवग्रहहोमपद्धतिः ॥

No. 322. वास्तुयागप्रयोगः । Vāstuyāgaprayogaḥ.

Substance:--Character Maithilī. Brown paper. Lines 9 on a page. Letters 36 in a line. Folia 4. 10×4½ inches. Appearance, old. Verse and prose. Complete. Not correct. Date (?) Place of deposit, Pandit Rabināth Jhā, Professor M. R. Vidyālaya and resident of Andhra Ṭhārhi P. O., Darbhanga. A manual of Karmakāṇḍa, dealing with Vāstuyāga.

Beginning. अथ वास्तुयागविधिः ।

स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात अद्येत्यादि एतद्वास्तुदोषोपशमनकामो वास्तुयागमहङ्करिष्ये इति संकल्प्य मातृकापूजावसोर्धारासम्पातनायुष्यसूक्तजयाविद्दश्राद्धानि विधाय प्रकृतकर्म कुर्यात् ॥

End. ततो महाव्याहृतिहोमंकृत्वाशाट्यायनहोमादि अभिविसर्जनान्तं कर्म समाप्य वास्तुदेवताभ्यो वलिं पायसेन दद्यात् । तत्रक्रमः एषपायसवलिः ओंईशानायनमः । एवंपर्यन्याय पिलिपिच्चान्तं दत्वा एषपायसवलिः ओंचरक्यै स्वाहाः इति दद्यात् । ततो दक्षिणां-कृत्वा उच्छिद्रावधारणंकुर्यात् ॥

Colophon. इतिवास्तुयागप्रयोगः ।

विषयः । नूतनावासगृहयागविधानप्रकारः ।

No. 323. वास्तुविधिः । Vāstuvidhiḥ.

Substance:—Character Maithilī. White paper. Lines 8 on a page. Letters 52 in a line. Folia 7. 14×3½ inches. Prose. Appearance, new. Complete. Correct. Date (?) Place of deposit, Pandit Maṇiśvar Jhā, Lālaganj, Jhañjhārpur P. O., Darbhanga.

Beginning. ओंनमो गणेशाय ।

अथ वास्तुविधिः ॥ महाकपिलरात्रे ॥

भूमेः परिग्रहे पूर्वंशिलायां स्थापने तथा ।

जलाधारगृहार्थञ्च त्यजेद्वास्तुंविशेषतः ॥

End. सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।

एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥

Colophon. इतिवास्तुपूजाविधिः समाप्तः ।

विषयः । वास्तुपूजाविधानम् ॥

———

No. 324. **वास्तुपूजाप्रकारः** । Vāstupūjāprakārah.

Substance:—Character Maithilī. White paper. Lines 7 on a page. Letters 56 in a line. Folia 3. 12¼×5 inches Appearance, fresh. Prose. Complete. Correct. Date (?). Place of deposit, Pandit Kapileśvar Jhā, Sakhabād Manīgāchī P. O., Darbhanga. A manual of Karmakāṇḍa, dealing with the worship of the deities at the time a new, house is built.

Beginning. ओं नमोभगवते वासुदेवाय ॥ अथ वास्तुपूजाप्रकारोविलिख्यते ।

हस्तमात्रंखनेत्खातं जलेनैवप्रपूरयेत् ।

तन्मध्येपूजयेद्देवं नैवेद्यंधूपदीपकैः ॥ १ ॥

तत्रादौसंकल्पः ॥ ओं अद्यामुकेमास्यमुके पक्षेऽमुकतिथावमुकगोत्रस्यसदारापत्यस्य-सपरिवारस्यामुकशर्म्मणा एतत्स्थाननिर्विघ्नपूर्वकचिरकालवाससुखसौमनस्यनैरुज्यदीर्घा-युष्ट्वबलपुष्टिप्राप्तिकामो वास्तुकर्म्मतदङ्गतया गणेशपूजनकलशस्थापनपञ्चदेवता-नवग्रहदशदिक्पालक्षेत्रपालषोडशमातृकानन्तपृथ्वीकूर्म्मनागवास्तुपुरुषपूजनमहं करिष्ये । इति संकल्पं कुर्य्यात् ॥

गर्गः ।

पूर्णकुम्भं समारोप्य साक्षतं पत्रगादिकम् ।

गन्धपुष्पादिभि र्लक्ष्मीं श्रीसूक्तेन प्रपूजयेत् ॥

इन्द्रादिलोकपालांश्वस्वदिक्षु घटे यजेत् ।

दिक्पालांश्चापि संपूज्यचतुर्दशमातृस्तथा ॥

अनन्तंवास्तुपुरुषं कूर्म्मपृथ्वीनवग्रहान् ।
पूजयेद् गन्धमालाद्यैः नागा अष्टौप्रयत्नतः ॥

प्रथमं गणपते इहागच्छइहतिष्ठेत्यावाह्य चन्दनादिभिः प्रपूजयेत् । ओं इन्द्र इहागच्छ इहतिष्ठेत्यावाह्य पञ्चोपचारैः प्रपूजयेत् ॥ ओं लोकपाला इहागच्छतइहतिष्ठतस्वविच्चु एषोर्घः ओं लोकपालेभ्योनमः । एवं चन्दनादिनैवेद्यान्तं पूजयेत् । ओं अष्टदिक्पाला इहागच्छत इह तिष्ठतेत्यावाह्य एषोर्घः ओं अष्टदिक्पालेभ्योनमः । एवं चन्दनादिनै वेद्यान्तं पूजयेत् । ओं चतुर्दशमातर इहागच्छत इहतिष्ठते त्यावाह्य एषोर्घः ओं चतुर्दशमातृभ्यनमः इत्यादिनैवेद्यान्तं पूजयेत् । ओं अनन्ताद्यष्टौनागाइहागच्छत इहतिष्ठतेत्यावाह्य एषोर्धः ओं अनन्ताद्यष्टाभ्यः नागेभ्योनमः । एवंचन्दनादिनै-वेद्यान्तंपूजयेत् ।

ओं सर्वलक्षणसम्पन्नसर्वेशकमठाधिपः ।
स्थानं देहिगृहार्थम्मेविष्णुरूपिन्नमोनमः । इतिप्रणाममन्त्रः ।

ओं वास्तुपुरुष इहागच्छ इहतिष्ठेत्यावाह्य एतानिपाद्यादीनि एषोर्घः ओं वास्तुपुरुषाय नमः । एवंचन्दनाक्षतपुष्पादिनैवेद्यान्तं वासांसि ओं विष्णुरूपाय वास्तुपुरुषाय नमः । एवं संपूज्य,

ओं वास्तुपुरुष नमस्तेस्तु भूशय्यानिरत प्रभो ।
मद्गृहे धनधान्यादिसमृद्धिं कुरुसर्वदा ॥ इतिप्रार्थयेत् ।

क्षमस्वेति विसर्जयेत । ओं धरित्रि इहागच्छ इहतिष्ठे त्यावाह्य,

ओं हिरण्यगर्भे वसुधे शेषस्योपरिशायिनि ।
वसाम्यहं तव पृष्ठेगृहाण र्घधरित्रि मे ।
एतानि पाद्यादीनि एषोऽर्घः ओं धरित्र्यैनमः ॥

चन्दनाक्षतपुष्पैः त्रिः संपूज्य एतानि गन्धपुष्पधूपदीपताम्बूलदध्यक्षतसहितवस्त्रनैवे-द्यानि धरित्र्यैनमः । क्षमस्वेति विसर्जयेत् । ओं साधिदैवत सप्रत्यधिदैवतविनाय-कादिपञ्चकसहितरव्यादिनवग्रहा इहागच्छत इहतिष्ठतेत्यावाह्य एतानिपाद्यादीनि एषोऽघ ओं साधिदैवतसप्रत्यधिदैवतविनायकादिपञ्चकसहितरव्यादिनवग्रहेभ्योनमः । पुष्पा-क्षतैः पूजयेत । एवं धराधरं पराशरं प्रजापतिं ग्रामदेवता इष्टदेवताः कुलदेवताश्च-पूजयेत । दध्यक्षताम्रपल्लवैः सर्वत्रपूज्याः ॥ अथदक्षिणा । ओं अद्यकृतैतद्वास्तुकर्म-प्रतिष्ठार्थं गामेकां रुद्रदैवतां यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे । दधिभक्त-दध्यक्षतं ताम्रपल्लवं किञ्चिद्द्रव्यं गर्तेनिक्षिप्यमृत्तिकां पूरयेत् । ब्राह्मणान् भोजयेत् ।

स्वयं भक्तवस्तुरस्तांकुर्यात् । अथेन्द्रादिदशदिक्पालेभ्यो माषसहितदधिभक्तबलिन्दद्यात । तद्यथा । तत्रपूर्वस्यांदिशि अश्ववाहनाय शक्तिहस्ताय तेजोधिपतये बलिंगृह्णाणस्वाहा इतिमन्त्रेण दधिभक्तबलिन्दद्यात् । आग्नेय्यांदिशि । छागवाहनाय वज्रहस्ताय वैश्वानर मूर्त्तये बलिंगृह्णाणस्वाहा । दक्षिणस्यांदिशि । महिषवाहनाय दण्डहस्ताय यममूर्त्तये, बलिंगृह्णाणस्वाहा नैऋत्यान्दिशि । गजवाहनाय वज्रहस्ताय इन्द्रमूर्त्तये बलिंगृह्णाणस्वाहा पश्चिमस्यां दिशि-गरुडवाहनाय शंखचक्रगदाहस्ताय शक्तिसहिताय विष्णुमूर्त्तये तेजोधिपतये बलिंगृह्णा स्वाहा । वायव्यां दिशि क्षेत्रपालायवायुमूर्त्तये मृगवाहनाय तेजोधिपतये बलिंगृह्णा स्वाहा । उत्तस्यांदिशि कुवेराय देवायसपरिवाराय गदाहस्ताय वसुमूर्त्तये बलिंगृह्णाणस्वाहा । ऐशान्यांदिशि । वृषवाहनायत्रिशूलशक्ति हस्ताय त्रिनेत्रायरुद्रमूर्त्तये तेजोधिपतये बलिंगृह्णाणस्वाहा । मध्ये पातालक्षेत्राय सहस्रफणाय द्विसहस्रलोचनाय वासुकिनागाय शक्तिहस्ताय सर्वनागाधिपतये नमो, बलिंगृह्णाणस्वाहा एवंदशदिक्पालेभ्योबलिंदद्यात् ॥

End. पूर्वोक्तदक्षिणा अत्रैव देया । ब्राह्मणान् भोजयेत् ॥

Colophon. इतिवास्तुपूजाप्रकारः समाप्तः ॥

विषयः । वास्तुपूजापद्धतिः ।

No. 325. विचारनिर्णयः By गोपाल । Vichāranirṇayaḥ.

Substance:—Character Maithili. White paper. Lines 9 on a page. Letters 52 in a line. Folia 9. 12½×5 inches. Appearance, old. Verse and prose. Incomplete. Incorrect. Date (?). Place of deposit, Pandit Mm Rājānāth Miśra, Saurath, Madhubani P. O., Dharbhanga. A hand book of Dhamaśāstra, dealing with Yāga, Dāna etc. by Gopāla.

Beginning. ओं नमो गणेशाय ॥

श्रीकृष्णचरणाम्भोजमकरन्दमधुव्रतः, न्यायपञ्चाननो वक्ति विचारनिर्णयंसुधीः । सच वि चाराईवाक्यस्य संशयपूर्वपक्षोपन्यासपूर्वकयथार्थनिश्चयात्मकः । तदुक्तं भट्टपादैः ।

विषयोविशयश्चैव पूर्वपक्षस्तथोत्तरं ।

निर्णयश्चेति पञ्चाङ्गं शास्त्रेधिकरणं स्मृतं ॥

End. तथा चात्मगामिफले संप्रवदे परगामिफले इदानीति विरोधः। अथ ऐन्द्रिक-विकल्पाङ्गीकारे अष्टदोषोपविस्यादिति चेत् अन्यथानुपपत्या यत्रान्यप्रकारा-संभवः तत्र व्यवहितलोकर्त्तव्य इति। तदुक्तं भट्टपादैः।

एवमेवाष्टदोषोऽपि व्रीहि यथादिवाक्ययोर्विकल्पाश्रितस्तत्रागतिरन्यान्यविद्यते अष्टदोषे यथा; प्रमाणत्वाप्रमाणः परि...

Colophon. नास्ति ॥

विषयः। यागदानादि।

Previous notice:—C. C. Pt. I. p. 569; Pt. III. p. 12. R. M. Pt. VI. p. 210; Pt. VII. p. 83.

No. 326. विधानपारिजातः By अनन्तभट्ट। Vidhānapārijātaḥ.

Substance:—Character Devanāgarī. White paper. Lines 9 on a page. Letters 38 in a line. Folia 233. 10×4¼ inches. Appearance, old. Verse. Complete. Generally correct. Date (?. Place of deposit, Pandit Dāmodar Jhā, Sāhapur, Pandaul P. O., Darbhanga. A treatise on Dharmaśāstra by Anantabhaṭṭa. Worm-eaten. Worn-out. Torn.

Beginning. श्री गणेशाय नमः ॥ श्रीरस्तु ॥

वन्दे श्रीमदनन्तसंज्ञगिरिपं लक्ष्मीनिवासं हरिं।
विघ्नध्वान्तदिवाकरं सुरगुरुंसर्वार्थसिद्धिप्रदं ॥
ब्रह्माशर्वसुरेन्द्रपूर्वकसुरा यस्य प्रसादात्सदा।
सर्वारब्धसमाप्तिमीयुरमलं मद्वंशदेवं परं ॥ १ ॥
नत्वा क्षिरोब्धिजानिं तथाब्रह्मादिकान्सुरान।
गणेशंविघ्नहर्तारं वन्देहैमवतीसुतम् ॥ २ ॥
चतुर्दशसु विद्यासुनिष्णाताः शुद्धमानसाः।
आपरोक्षब्रह्मतत्वा जयन्ति गुरवो मम ॥ ३ ॥
श्रुतिसकलरहस्यं बिम्बितं यस्य चित्तमुकुटइवविशुद्धेदोषमालिन्यशून्ये।
स्वपदविमलभक्त्या यस्यतुष्टो रमेशो जनकजनकपल्लंभट्टमेनं नतोस्मि ॥ ४ ॥
जातोहमप्र्येण मनोरथेन यस्यानुकंपामृतवृष्टिपुष्टः।
पारंगतम्चाखिलदर्शनानांनागेशभट्टंजनकं नतोस्मि ॥ ५ ॥

वन्दे भागीरथीमम्बां गुर्वीरम्बेवशालिनीम् ।
यत्प्रसादादहंप्राज्ञोसंजातोजडधीरपि ॥ ६ ॥
श्रीमत्काणवकुलाब्धिशीतकिरणो विद्याकलानांनिधिः ।
श्रीमद्विष्णुपदाश्रितः सरसगुविर्द्वचकारश्रियः ॥
भट्टश्चन्द्रइमं पितृव्यभमिनम्यानन्तभट्टः सुधी ।
नानाशान्तिविधानसत्सुरतरुं व्यारोपयद्भू तले ॥ ७ ॥
विधानपारिजातोयं पञ्चस्तवकसंयुतः ।
नानाविधानगंधोत्कः संसेव्यो विबुधैरिह ॥ ८ ॥
प्रथमे स्तवके स्वस्तिवाचनादिकमुच्यते ।
द्वितीयेऽष्टयज्ञादिजातशान्तिकमीर्यते ॥ ९ ॥
तृतीये गुरुशान्त्यादि अतवन्धविवाहयोः ।
प्रकीर्णानि विधानानिकीर्त्यन्तेचचतुर्थके ॥ १० ॥
मरणस्यविधानानिकथ्यन्तेपञ्चमेत्तु ।
जननादिक्रमेणैवशान्तिक्रमइहेरितः ॥ ११ ॥

End. मनोरथाभिवर्षिण्या विदुषामनुकम्पया ।
विधानपारिजातेत्र द्वितीयस्तवकोऽभवत् ॥
अहो अवस्यनिवन्धस्य महिमाकिमुवर्ण्यते ।
यतः श्रीमदनन्तोऽस्य हरिः कारयिता मया ॥
शान्तिग्रन्थसहस्राणि देशेदेशेमहान्त्यपि ।
कोप्यस्यमहिमावेथोभिज्ञैर्जयति सर्वतः ॥

Colophon. इतिश्रीमत्परमवैदिकश्रीमन्नागदेवभट्टसूनुना श्रीमदनन्तभट्टेन विरचिते विधानपारिजातेनिवन्धेद्वितीयः स्तवकः समाप्तः ॥ छ ॥ ॥ शुभमस्तु ॥ ॥ छ ॥
श्री रामायनमः ॥ छ ॥

विषयः । स्वस्तिवाचनादि दुष्टऋक्षजातशान्ति गुरुशान्तिप्रकीर्णकादयोऽत्रविषयाः ।

No. 327. **विधानपारिजातः** By **अनन्तभट्ट** । Vidhānapārijātaḥ.

Substance:—Character Devanāgarī. White paper. Lines 10 on a page. Letter 36 in a line Folia 100. 10×4½ inches. Appearance, old. Verse and prose. Complete. Generally

correet. Date (?). Place of deposit, Pandit Dāmodar Jhā, Sāhapur, Pandaul P. O., Darbhanga. A treatise on Dharmaśāstra dealing with marriage ceremony by Anantabhatta. Worm-eaten. Torn.

Beginning. श्रीगणेशायनमः ।

वन्दे वन्द्यतमं विष्णुं सत्यज्ञानस्वरूपिणं ।
ब्रह्मादिवन्द्यचरणं भवविघ्नविनाशनं ॥
अथेदानीं तृतीयस्तवक आरभ्यते,
तत्रगृहस्थसंबन्धिविधानानि निरूप्यन्ते:
तत्रतावद्गुरुशान्तिविधानं । शौनकीये ॥
बुद्धिशीलगुणोपेतां कन्यकामथगोत्रजां ।
आत्मनोऽवरवर्षांच विवहेद्विधिपूर्वकम् ॥

End. सान्तिग्रन्थसहस्राणि प्रणीतानि बुधैरिह ।
कोप्यस्य महिमावेद्योभिज्ञैर्जयति सर्वतः ॥
विधानपारिजातस्य स्तवकेस्मिंस्तृतीयके ।
विवाहाभिधसंस्कारसत्पुष्पं समजायत ॥
अनेन प्रीयतां देवो रमालालितपादुकः ।
ममानन्तस्य यासेनानन्तो यो देशकालतः ॥

Colophon. इतिश्रीमत्परमवैदिकश्रीनागदेवभट्टात्मजेन श्रीमदनन्तभट्टेन विरचिते विधानपारिजाते तृतीयस्तवके विवाहविधानं समाप्तम् ॥

विषयः । विवाहविधाननिरूपणम् ॥

Previous notice:—C.C. Pt. I. p. 576; Pt. II. p. 136; Pt. III. p. 121.

No. 328. **विधानपारिजातः** By **अनन्तभट्ट** । Vidhānapārijātah.

Substance:—Character Devanāgarī. White paper. Lines 16 on a page. Letters 42 in a line. Folia 76. 10×4 inches. Appearance, old. Verse and prose. Incomplete. Incorrect. Date (?). Place of deposit, Pandit Dāmodar Jhā, Sāhapur, Pandaul P. O., Darbhanga. A treatise on

Dharmaśāstra, dealing with miscellaneous subjectes by Anantabhatta. Worm-eaten.

Beginning. श्रीगणपतयेनमः ।

विश्वस्ययोनिंविश्वेशंविश्वस्याप्यथकारणं ।
विश्वरूपमनन्तंमेकुलदेवंनमाम्यहम् ॥
अथेदानींचतुर्थस्तवकआरभ्यते,
तत्रप्रकीर्णकानिविधानानिकथ्यन्ते;
तत्रादौदानविधानानि: तत्रदानप्रशंसा, तैत्तिरीयके ।
दानेनद्विषन्तोमित्राभवन्ति,
दानेसर्वंप्रतिष्ठितंतस्माद्दानंपरमंवदन्तीति ।
वाजसनेयकेऽपि तदेतत्त्रयंशिक्षेद्दमंदानंदयामिति ॥
नन्दिपुराणेपि दानंपरंप्रशंसन्तिदानमेवपरायणं ।
दानंवन्धुर्मनुष्याणांदानंकोशोह्यनुत्तमः ॥

End. शक्त्याचभूयसींदद्याद्विजान्वैभोजयेत्तथा ।
शतंतदर्धमर्धंवाशक्त्यभावेदशापिवा ॥
सर्वशान्तिपाठयित्वागृह्णीयाद्द्विजाशिषः ।
एवंकृतेभवेच्छान्तिः काकारिष्टविनाशिनी ॥

Colophon. इतिश्रीमदनन्तभट्टविरचिते विधानपारिजातेकाकमैथुनदर्शनादिशान्तिविधानम् ॥

विषयः । काकमैथुनादिप्रकीर्णविधाननिरूपणम् ।

No. 329. **विभागसारः** By **विद्यापतिठक्कुर ।** Vibhāgasārah.

Substance:—Character Maithilī. White paper. Lines 9 on page. Folia 20. 12×5 inches. Appearance, fairly old. Verse and prose. Complete. Incorrect. Date (?). Place of deposit, Pandit Bachchā Jhā, Navāni, Tamuriā P. O., Darbhanga.

Beginning. श्रीगणेशाय नमः ॥
गङ्गामेसौ प्रथयकथमहोवेध्यावीतिप्रसिद्धेः ।
किन्नाम्नामेस्तिभोगः सतुभवतु तथाभेदभाजः प्रमाणं ॥

भिन्नोऽहं कोत साक्षी विधिरिति विधिना सस्मितं वीक्ष्यमाणौ ।
पायास्तांनिर्विवादौ सपदि हरिहरौ व्यक्रमम श्रोत्तरात्र ॥
राज्ञोभवेशाद्धरिसिंह आसीत्तत्सूनुनादर्पनरायणेन ।
राज्ञा नियुक्तोऽत्रविभागसारंविचार्य विद्यापतिराततनोति ॥

End. स्वभागान्यविद्युस्ते विक्रियं युरथापि वा ।
कुर्यायथेष्टं तत्सर्वमीशास्तेस्वधनस्यवै ॥

Colophon. इति म० म० श्री विद्यापति ठक्कुरविरचिते विभागसारः ॥

विषयः । दायभागविचारो, द्वादशपुत्रलक्षनणिरूपणं, अपुत्रधनाधिकारिनिरूपणं, स्त्रीधन-विभागनिरूपणमित्यादि ॥

Previous notice:—C.C. Pt. I. p. 578. R. M. Pt. VI. p. 69.

No. 330. **विभागसारः** By **विद्यापतिठक्कुर** । Vibhāgasārah.

Substance :—Character, Maithilī. White paper. Lines 6 on a page. Letters 44 in a line. Folia 32. 14×4 inches. Appearance, new. Prose and verse. Incomplete. Incorrect. Date (?). Place of deposit, Pandit Sasinath Miśra, Lālaganj, Jhañjhārpur P.O., Darbhanga.

No. 331. **विवादचन्द्रः** By **मिसरुमिश्र** । Vivādachandrah.

Substance:—Character, Maithilī. White paper. Lines 10 on a page. Letters 68 in a line. Folia 45. 16×3½ inches. Appearance, old. Prose and verse. Complete. Generally correct. Date(?) Worn-out. Letters affected. Margins are in bad condition. Place of deposit, Raj Library, Darbhanga. A treatise on Dharmaśāstra, dealing with legal points, by Miśaru Miśra.

Begnining. श्रीविघ्नेशाय नमः ।
वन्दे श्रीकण्ठवैकुण्ठावकुण्ठौ नतनन्दने ।
विघ्नविच्छेदकुशलौ गिरिजाजलजापती ॥
अभूदभूतप्रतिमल्लगन्धो राजा भवेशः किल सार्वभौमः ।
अत्याजयद्यो वहु भर्तृकत्वं दोषं भुवोपि प्रभुरप्रधामा ॥
तस्मात्तनूजोजनिसूनुसारोधीमान्नुमासूनुसमानसारः

राजोपजीव्यो हरसिंहनामा ततो नृपो दर्पनरायणोऽभूत् ॥
दर्पनारायणनृपतेः श्रीमद्धीरामहादेवी ।
अलभत सुनयं तनयं नरपतिगुणराशिपूरितं शूरं ॥
श्रीमल्लखिमादेवी तस्य श्रीचन्द्रनृपतेर्दयितस्य ।
मिसरुमिश्रद्वारा रचयति विवादचन्द्रमभिरामम् ॥
विवादे व्यवहारे च व्यवस्था यत्र यादृशी ।
निबन्धृभिः कृता सात्र लिख्यते सूरिणां मुदे ॥

End. ब्राह्मणस्य क्षत्रियापुत्रादिषु अनौरसापत्तौ सर्वेषां वर्णानां व्यवहारविरोधापत्तेरिति ।

Colophon. इति महामहोपाध्याय सन्मिश्रश्रीमिसरुमहाशयकृतो विवादचन्द्रः संपूर्णः ॥०॥ ॥ श्री कृष्णाय नमः ॥ श्री रामाय नमः ॥ श्रीकृष्णाय नमः ॥ श्रीहरपतिशर्मणा लिखितं पुस्तकमिदं स्वार्थं आश्विन...

Previous notice :—C.C. Pt. I. p. 579, Pt. II. p. 137, Pt. III. p. 122. R. M. Pt. V. p. 172.

A. **विवादचन्द्रः** By **मिसरु मिश्र** । Vivādachandraḥ.

Substance :—Character, Maithilī. White paper.. Lines 7 on a page. Letters 67 in a line. Folia 79. 13×3 inches. Appearance, old. Prose. Incomplete. Generally correct. Date (?). Place of deposit, Pandit Śiveśvar Jhā, Lālaganj, Jhañjhārpur P. O. Darbhanga.

Beginning, End, Colophon, विषय :—Same.

B. **विवादचन्द्रः** By **मिसरु मिश्र** । Vivādachandraḥ.

Substance :—Character, Maithilī. White paper. Lines 13 on a page. Letters 58 in a line. Folia 45. 12½×5 inches. Appearance, old. Prose. Complete. Generally correct. Date, Śaka 1717. Place of deposit, Babu Bachan Jhā, son of Paṇḍit Kaṇṭu Jhā, Naḍuār, Jhañjhārpur P. O., Darbhanga.

Beginning, End, Colophon, विषय:—Same.

C. विवादचन्द्रः By मिसरु मिश्र । Vivādachandraḥ.

Substance :—Character, Maithilī. White and yellow paper. Lines 10 on a page. Letters 59 in a line. Folia 55. 12×4 inches. Appearance, new. Complete. Incorrect. Date, Śaka 1753. Place of deposit, Pandit Gonū Miśra, Lālaganj, Jhañjhārpur P. O., Darbhanga.

Beginning, End, Colophon, विषय :—Same.

D. विवादचन्द्रः By मिसरु मिश्र । Vivādachandraḥ.

Substance :—Character, Maithilī. Palm leaves. Lines 5 on a page. Letters 64 in a line. Folia 89. 14×1½ inches. Appearance, old. Prose. Torn. Not in order. Incomplete. Correct. Date (?). Place of deposit, Pandit Nīlakaṇṭha Singh Jhā, Chanaur, Manīgāchī P. O., Darbhangaḥ.

Beginning, End, Colophon, विषय : —Same.

E. विवादचन्द्र By मिसरु मिश्र । Vivādachandraḥ.

Substance :—Character, Maithilī. White paper. Lines 10 on a page. Letters 50 in a line. Folia 75. 12×4 inches. Appearance, old. Prose. Complete. Correct. Date, Śaka 1692. Worn-out. Place of deposit, Babu Ādyānāth Miśra, Pāhītol, Manīgāchī P.O., Darbhanga.

Beginning, End, Colophon, विषय:--Same.

F. विवादचन्द्रः By मिसरु मिश्र । Vivādachandraḥ.

Substance :—Character, Maithilī. Yellow paper. Lines 7 on a page. Letters 55 in a line. Folia 72. 12×3½ inches. Appearance, old. Prose. Complete. Incorrect. Date (?). Place of deposit, Pandit Phudī Jhā, Avām, Jhañjhārpur P.O., Darbhanga.

Beginning, End, Colophon, विषय :—Same.

G. विवादचन्द्रः By मिसरु मिश्र। Vivādachandraḥ.

Substance:—Character, Maithili. White paper. Lines 12 on a page. Letters 64 in a line. Folia 45. 12×4 inches. Appearance, fairly old. Verse and prose. Complete. Incorrect. Date wanting. Place of deposit, Pandit MM. Rājināth Miśra, Saurath, Madhubani P. O., Dharbhanga. A treatise an Dharmaśāstra, dealing with legal points by Miśaru Miśra at the suggestion of Lakhimā Ṭhakurāṇī.

Beginning, End, Colophon, विषय:—Same.

H. विवादचन्द्रः By मिसरु मिश्र। Vivādachandraḥ.

Sub tance:—Character Maithili. Palm leaves. Lines 5 on a page. Letters 86 in a line. Folia 99. 14½×1¾ inches. Appearance, old. Worn-out. Verse and prose. Complete. Correct. Date, La. Sam. 536. Place of deposit, Babu Śukadeva Jhā, Pachadhī, Pandaul P. O., Darbhanga. A treatise on Dharmaśāstra, dealing with legal points by Miśaru Miśra, at the suggestion of Lakhimā Ṭhakurāṇī. Worm-eaten at the end.

Beginning, End, विषय:—Same.

Colophon. इति महामहोपाध्यायसन्मिश्रश्रीमिसरुमहाशयकृतो विवादचन्द्रः समाप्तः।

रसगुणमदनशराङ्कितगौडमहीपालसम्बते वर्षे।

घटमानौ सितपक्षेतिमिषि पुस्तकं श्रीशुभङ्करो व्यलिखत्॥

यस्य गौस्त्वयिन तस्य कदाचिद्गोपशावकपयोधरयोगः।

यस्य न त्वयिच तस्य विचित्रं भूरि जन्मनि पयोधरयोग:॥

समुद्धृतव्याधममापराधः क्रियाम्न जाने हृदये तवास्ति।

भवाम्बुराशौ विषयानुबन्धपाशेन गाढं यदहं निबद्धः॥

I. विवादचन्द्रः By मिसरु मिश्र। Vivādachandraḥ.

Substance:—Character, Maithili. White paper. Lines 9 on a page. Letters 46 in a line. Folia 62. 13×4 inches. Appearance, old. Prose and verse. Complete. Incorrect. Soiled. Worn-out. Date, Śaka 1702. Place of deposit, Pandit Baladeva

Jhā, Raiām, Lohāt P. O., Darbhanga.. A treatise on Dharmaśāstra, dealing with legal points by Miśaru Miśra.

Beginning, End, विषयः—Same.

Colophon. इति महामहोपाध्यायसन्मिश्रश्रीमिसरुमहाशय कृतोविवादचन्द्रः समाप्तः ।
शुभमस्तु श्रीरस्तु ॥ ओं नमस्तस्यै ॥
शाके युग्मखसप्तेन्दुयुक्तेराधाष्टमीं रवौ ।
हेमाङ्गदोऽलिखदिदं पुस्तं देवपुरीतटे ॥
ओं नमस्तस्यै जह्नु कन्यायै नमः ।

No. 332. विवादचिन्तामणिः By वाचस्पति । Vivādachintāmaṇiḥ.

Substance :—Character, Maithilī. White paper. Lines 10 on a page. Letters 69 in a line. Folia 56. 14×4 inches. Appearance, old. Verse and prose. Complete. Correct. Date(?) Worn-out partly. Partly torn. Place of deposit, Pandit Vāsudeva Miśra, Salampur, Ghataho P.O., Darbhanga. A treatise on Dharmaśāstra dealing with legal points by Vāchaspati Miśra.

Beginning. श्री नमः शिवाय ।
क्षीराब्धेरुज्जिराहानां त्रिदशपरिषदि प्रोल्लसद्भ्रू विभङ्गी-
भङ्गीकुर्वन् कलत्रं त्रिभुवनजननीं व्रीडया नम्रमौलिः ।
देवः पायादपायात्कुसुमशरपरीरम्भसंजातभावः,
सद्यःस्विद्यत्तरेखास्मितकमलमुखीमाददानः करेण ॥
श्रीकृत्यकल्पद्रुमपारिजातरत्नाकरादीनवलोक्य यत्नात् ।
वाचस्पतिः श्रीपतिनम्रमौलि र्विवादचिन्तामणिमातनोति ॥

End यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक् ।
न साहसिकदण्डघ्नो स राजा शक्रलोकभाक् ॥
एतेषां निग्रहो राज्ञा पञ्चानां विषये स्वके ।
साम्राज्यकृत्स जातस्तु लोके चैव यशस्करः ॥

Colophon. इति महामहोपाध्यायमिश्रश्रीवाचस्पतिविरचितो विवादचिन्तामणिः समाप्तः ।

विषयः । ऋणादानदायभागाधिकारिनिर्णयाश्चखिलविवादस्थलनिर्णयोऽस्मिन्ग्रन्थे ॥

Previous notice :—C.C. Pt. I. p. 579, Pt. II. p. 137, Pt. III, p. 122. R. M. Pt. III. p. 35. A. C. Pt. I p. 135. C. M. Vol. I. Pt. VI. p. 17.

A. विवादचिन्तामणिः By वाचस्पति मिश्र। Vivādachintāmaṇiḥ.

Substance :—Character, Maithili. Palm leaves. Lines 6 on a page. Letters 77 in a line. Folia 96. 14½×2½ inches. Appearance, old. Prose. Complete. Generally correct. Date (?) Worn-out. Torn. Place of deposit, Pandit Ādyānāth Miśra, Pāhītol, Manīgāchī P.O., Darbhanga.

Beginning, End, Colophon, विषयः—Same.

B. विवादचिन्तामणिः By वाचस्पति मिश्र। Vivādachintāmaṇiḥ

Substance :—Character, Maithili. White paper. Lines 6 on a page. Letters 42 in a line. Folia 148. 14×3½ inches. Appearance, new. Prose. Complete. Incorrect. Date, Śaka, 1812. Place of deposit, Pandit Gaṅgānāth Miśra, Pāhītol, Manīgāchī P.O., Darbhanga.

Beginning, End, Colophon, विषयः—Same.

C. विवादचिन्तामणिः By वाचस्पति मिश्र। Vivādachintāmaṇiḥ.

Substance :—Character, Devanāgarī. Dark—white paper. Lines 10 on a page. Letters 50 in a line. Folia 77. 13×5 inches. Prose and verse. Appearance, old. Worn-out. Letters not legible. Complete. Not correct. Date (?). Place of deposit, Raj Library, Darbhanga. A treatise on Dharmaśāstra dealing with legal points by Vāchaspati Miśra.

Beginning, End, Colophon, विषयः—Same.

D. विवादचिन्तामणिः By वाचस्पति मिश्र। Vivādachintāmaṇiḥ.

Substance :—Character, Maithili. White paper. Lines 10 on a page. Letters 32 in a line. Folia 46. 12×4½ inches. Apnearance, old. Worn-out. Incomplete. Correct. Date (?

Place of deposit, Pandit Rāghava Jhā, Andaulī, Mādhavapur P. O., Darbhanga. A treatise on Dharmaśāstra dealing with legal questions by Vāchaspati Miśra

Beginning, End, Colophon, विषयः—Same.

E. विवादचिन्तामणिः By वाचस्पति मिश्र । Vivādachintāmaṇiḥ.

Substance :—Character, Maithilī. White paper. Lines 9 on a page. Letters 44 in a line. Folia 29. 12×5 inches. Verse and prose. Appearance, fairly old. Incomplete. Incorrect. Date (?) Place of deposit, Pandit Rāghava Jhā, Andaulī, Mādhavapur P. O., Darbhanga. A treatise on Dharmaśāstra by Vāchaspati Miśra. This Ms. contains only extracts from the work.

Beginning, End, Colophon, विषय:—Same.

No. 333. विवादनिर्णयः By गोपाल । Vivādanirṇayaḥ.

Substance :—Character, Maithilī. Brown paper. Lines 8 on a page. Letters 64 in a line. Folia 37. 18×3½ inches. Appearance, old. Worn-out. Soiled. Verse and prose. Complete. Generally correct. Date (?). Place of deposit, Raj Library, Darbhanga. A treatise on Dharmaśāstra dealing with Dāyabhāga by Gopāla Nyāyapañchānana. Torn. This Ms. contains विवादनिर्णय also.

Beginning. ओं न्मो गणेशाय ॥

श्रीकृष्णचरणाम्भोजं ध्यात्वा गोपालशर्मणा ।

वितन्यते विवादेषु दायभागस्य निर्णयः ॥

End. शंखः ।

गोत्रभागविभागार्थे सन्देहे समुपस्थिते ।

गोत्रजेनापरिज्ञाते कुलं साक्षित्वमर्हति ॥

तेनापरिज्ञाते अन्यसाक्षीत्यर्थः ।

Colophon. इति श्रीगोपालन्यायपञ्चाननभट्टाचार्यकृतविवादनिर्णयः समाप्तः ॥ श्रीहरयेनमः

श्रीश्रीमुकुटमणिवाचस्पतिभट्टाचार्यपुस्तकमिति ।

विषयः । दायभागविचारः ।

Previous notice :—C.C. Pt. I. p. 580. R. M. Pts. II, III. pp. 352, 57. A. C. Pt. I. p. 135.

No. 334. विवादनिर्णयः By गोपाल । Vivādanirṇayaḥ.

Substance :—Character, Bengali. Yellow paper. Lines 6 on a page. Letters 35 in a line. Folia 25. 16×3 inches. Appearance, old. Worn-out. Torn partly. Verse and prose. Generally correct. Complete. Date (?). Place of deposit, Raj Library, Darbhanga. A treatise on Dharmaśāstra, dealing with Legal questions i.e. with the 18 Vivādas, enumerated by Manu, by Gopāla Nyāyapañchānana, the well known author of Prāyaśchittakadamba. This is the last of his works.

Beginning. ॐ गणेशाय नमः ॥

श्रीकृष्णचरणाम्भोजं ध्यात्वा गोपालशर्मणा ।

अष्टादशविवादानां निर्णयोऽत्र निगद्यते ॥

अथ विवादनिर्णयः । निर्णयस्तु सयुक्तिक एव करणीयः । यथा च बृहस्पतिः ।

केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः ।

युक्तिहीनविचारे तु धर्महानिः प्रजायते ॥

End. व्यवहाराश्रितं प्रश्नं पृच्छति प्राडिति स्मृतः ।

विवेचयति यस्तस्मिन् प्राड्विवाकः स उच्यते ॥

स्वभावोक्तं अकृत्रिमं एतच्च स्वरविशेषण ज्ञेयम् । अतएव याज्ञवल्क्यः ।

...स्थभूतेन व्यवहारं नयेन्नृपः । भूतमप्यनुपन्यस्तं...ते व्यवहारतः ।

नारदः ।

भूततत्वार्थसंयुक्तं प्रमाणाभिहितं फलमिति ।

Colophon. इति श्रीगोपालन्यायपञ्चाननभट्टाचार्यविरचितो विवादनिर्णयः ।

विषयः । दायभागविचारः ।

No. 335. विवादभङ्गार्णवः By जगन्नाथ । Vivādabhaṅgārṇavaḥ.

Substance :—Character, Bengali. White paper. Lines 8 on a page. Letters 45 in a line. Folia 351. 13×5 inches. Appearance, fresh. Prose and verse. Complete. Not correct.

Worm-pierced. Date (?) Place of deposit, Raj Library, Darbhanga. A treatise on Dharmaśāstra dealing with politics by Jagannātha Tarka-pañchānana. This author lived later than Mitra Miśra, Chandeśvara, Bhavadeva and Śūlapāṇi.

Beginning. ओं नमो गणेशाय ।

देवेशभूतेशगणेशविघ्नराजान् नमस्कृत्य गिरीन्द्रकल्पां ।
गुरून् मुनीन् ग्रन्थकृतोऽभिमान्यान् भूपाश्रयो ग्रन्थमहं करोमि ॥
विवादभङ्गार्णवनामधेयं वैषम्ययुक्तं बहुविस्तृतञ्च ।
सद्वीप रत्नं नृपधीरकृत्यं रौद्रिर्जगन्नाथ इति प्रसिद्धः ॥
क्व मे बुद्धिर्जीर्णनौका क्व शास्त्रं दुर्गमाम्बुधिः ।
प्रत्यनुग्रह एवैनं तरणे शरणं तया (?) ॥
राधाकान्तः सुधियो विमलदृढमतिः श्रीगुरुः सुप्रसादः
श्रीरामो मोहनान्तो निधिरपि परशौरामतः श्रीघनश्च ।
श्यामान्तश्रीलगङ्गाधर इति विदितो यत्नवान् शिष्यवर्गः
कुर्यात्तत्कार्यसिद्धिं नृपबुधरमणीं निश्चयो मे विशङ्कः ॥
पोतयानशरणः किल सिन्धुं निर्भया बहु तरंति दुर्गमम् ।
दीर्घसद्गुणसहायमेताः स्वानुकूलपवनेशनियुक्ताः ॥
धर्मशास्त्रेषु यत्प्रोक्तं ऋणदानादि सूरिभिः ।
व्याख्यातञ्च तथा पूर्वैर्ग्रन्थकृद्भिः सुबुद्धिभिः ॥
आलोच्य तेषां व्याख्यानि गूढार्थानि मनीषया ।
गुरूपदेशात्सर्वन्तत्सुविचिन्त्य निरुच्यते ।

End. यत्र चौरस्य षट्शतपणो दण्ड ...तदवधि...दण्डारातुरन्यूनत्वेतु चौर सप्रमाणाश्रवण च षट्शतपत्याइति किं दण्डस्य न्यूनत्वाय अधिकत्वाय वा इत्यत्र विनिगमना-विरह इति वाच्यं सम्बन्धिनां भोगार्हत्वेन न्यूनत्वस्यैव युक्तत्वादिति भावनीयमिति दिक् ॥ अस्ताभिविक्रयं स्याङ्गोगाहूनां ॥

Colophon. परिच्छेदज्ञानाखिलविद्याधारापरिशीलनविमलीकृतपालधिकुलप्रसूतजान्हवीसमलङ्कृतत्रिवेणीनिलयश्रीहरतर्कवागीशात्मजश्रीजगन्नाथतर्कपञ्चानन भट्टाचार्यकृते विवाद-भङ्गार्णवे निःशेषादिद्वीपे अन्तशोभान्वितेन्द्रनीलरत्नं चतुर्थं ॥ * ॥
समासश्चायंग्रन्थः ॥ * ॥ गुरुचरणे ममसतिरस्तु ॥ * ॥

शुभम्करः श्रीरामप्रसादशर्म्मणेः सा किम श्रीश्रीशेक्रकाशीवासि ॥ * ॥ * ॥

श्रीशिवजयति ॥

विषयः । ऋणादानादस्वामिविक्रयान्तविचारः ।

Previous notice :—C.C. Pt. I. p. 580, Pt. II. p. 137, Pt. III, p. 122, C. M. Vol. I, Pt. VI, p. 24, Tr. C. Mss. Pt. I. C. p. 4120.

No. 336. विवादरत्नाकरः By चण्डेश्वर । Vivādaratnākaraḥ.

Substance:—Character Maithili. White paper. Lines 27 on a page. Letters 58 in a line. Folia 87. 14¾×7½ inches. Appearance, old. Prose. Complete. Correct generally. Date (?). Worn-out. Place of deposit, Pandit Dāmodar Jhā, Ṭhārhi, Andhrathārhī P. O., Darbhanga.

Beginning. ओं नमो भगवते वासुदेवाय ।

कुसुमशरविलासे भक्तुरस्याद्रिपुत्री-
करतलवलयस्य क्रमागतस्यार्धमेकं ।
निजमिव शशिखण्डं मन्यमानस्य शम्भो-
र्भवतु सह विवादः कान्तया कौतुकाय ॥
जटायां वद्धायां भवजयिना विश्वपतिना,
विवादं जातं तद्धनविभजने तत्तनययोः ।
परिच्छिन्दन् ब्रह्मा गणपतिविशाखौ नियमयन् ,
स्तुवे दायादायव्यवहृतिविपश्चिद्भवतु वः ॥
श्रीचण्डेश्वरमन्त्रिणा मतिमता तेन प्रसन्नात्मना,
नेपालाखिलभूमिपालजयिना पुण्यात्मना कर्म्मणा ।
वाग्वत्याः सरितस्तटे सुरधुनीसाम्यं दधत्याः शुचौ,
मार्गे मासि यथोक्तपुण्यसमये दत्तस्तुलापूरुषः ॥
यो गम्भीरविवादवारिधिजले निर्मज्जतामुद्धृतिं,
कुर्वन्पोत इवोल्लसद्गुणतरः कीर्तिं परामश्नुते ।
मीमांसानयनो विचारचतुरो मन्त्रीन्द्रचण्डेश्वरः,
स श्रीमानपरो विवादविषयं प्रस्तौति रत्नाकरम् ॥

श्रीमद्विवादपदुर्गतिप्राप्तकाला-
प्युद्धारहेतुकृतनिर्णयलब्धपुण्यः ।
चण्डेश्वरः सचिवरत्नमिमं विवाद-
रत्नाकरं रचयति श्रुतिशास्त्रविज्ञः ॥
ऋणादानं ततो वृद्धिरकृता वृद्धिरप्यथ ।
वृद्धिश्च परमा वृद्धिनिषेधस्तदनन्तरम् ॥
अथाधिविधिसिद्धिश्च ततोऽपि प्रतिभूविधिः ।
ऋणादानमिह प्रोक्तमुद्धाहलविधिस्ततः ॥
निक्षेपोऽथ ततोऽस्वामिविक्रयः परिकीर्त्तितः ।
सम्भूय च समुत्थानं ततो दत्ताप्रदानिकम् ॥
अथाभ्युपेत्या शुश्रूषा दास्यमोक्षस्ततः परः ।
अथ दास्याधिकारी च वेतनस्यानपक्रियाः ॥
पण्यस्त्रीणां विधिश्चात्र कथितस्तदनन्तरम् ।
स्वामिपालविवादश्च ततः संविद्व्यतिक्रमः ॥
विक्रीयासंप्रदानञ्च क्रीत्वा चानुशयस्तथा ।
सीमाविवादोऽप्यपरः सेतुश्च कथितस्ततः ॥
कृष्टाकृष्टे शस्यरक्षा शस्यघातकदण्डनम् ।
अदण्ड्योऽथ वाक्पारुष्यं दण्डपारुष्यमेव च ।
स्तेयं स्तेनः प्रकाशानां तस्कराणां च दण्डनम् ॥
दण्डश्चाथ प्रकाशानां तस्कराणामिहोदितः ।
चौरान्वेषणमप्यत्र स्तेनस्याथातिदेशनम् ॥
वर्णतस्तेनकथनमस्मिन् रत्नाकरे कृतम् ।
स्तेनालाभे तथा दानं साहसं चाथ कीर्त्तितम् ॥
धावकान्वेषणञ्चात्र तथा संग्रहणन्ततः ॥
दण्डश्चाभिगमे प्रोक्तः कन्याया दूषणन्ततः ।
बन्धक्यभिगमे दण्डो धर्म्मस्त्रीपुंसयोस्ततः ॥
स्त्रीरक्षा योषितान्धर्मः प्रोषितस्वामिनीविधिः ।
मृतस्वामिवधूधर्मो नियोगश्च ततः परम् ॥
परपूर्वाक्षयभागो जीवत्पितृकरनूनम् ।
प्रमीतपितृकाणाञ्च विभागस्तदनन्तरम् ॥

अनेकमातृभ्रातॄणां विभागश्च ततः परम् ।
विभागानधिकारी च विभाज्यमथ श्री...,
अविभाज्यं ततः स्त्रीणां धनक्रमनन्तरम् ॥
स्त्रीणां धने विभागश्च...प्रजाया धने ततः ।
लग्नयां स्त्रीधने लुप्तविभागश्च ततः परम् ॥
नानावर्णायुतानाञ्च वि...गोऽथ विभक्तजैः ।
विभक्तागतभागश्च विभागस्तनयान्तरैः ॥
औरसः क्षेत्रजः पुत्रः पुत्रिकासुता...ि ।
पौनर्भवश्च कानीनो गूढोत्पन्नस्ततः पुनः ॥
सहोढो दत्तकः क्रीतः स्वयम्चोपगतस्ततः ।
अपविद्धः कृत्रिमश्च शूद्रापुत्रस्ततःपरम् ।
पुत्रत्वस्य विचारोऽस्मिन्नतिदेशः सुतस्य च ॥
अथ पुत्रनिरुक्तादि निन्दिताश्चात्र कीर्तिताः ।
अपुत्रार्थविभागश्च भागः संसृष्टिनां ततः ॥
विभागनिर्णयः कृत्यं विभक्तानां ततः परम् ।
समाह्वयः समयतः क्रियाभेदः प्रकीर्णकम् ॥
तरशुल्कं ततः प्रोक्तं निधिः परनिधिस्तथा ।
विधिर्दण्डप्रणयने दण्डोत्कर्षादिकं ततः ॥
ब्राह्मणस्य परीहारः परीहारः परस्य च ।
दण्डसंज्ञा मानसंज्ञाऽस्मिन्नेगमवादिनः ॥
शतमेकं तरङ्गानां विदुषां चित्तरञ्जनम् ।
विधीयन्ते विधिज्ञेन श्रीचण्डेश्वरमन्त्रिणा ॥

End

श्रीकृत्यदानव्यवहारशुद्धिपूजाविवादेषु तथा गृहस्थे ।
रत्नाकरा धर्मभुवो निबन्धाः कृतास्तुलापूरुषदानसप्त ॥

रसगुणभुजचन्द्रैः सम्मिते शाकवर्षे सहसि धवलपक्षे वाग्वतीसिन्धुतीरे ।
अजिततुलितमुच्चैरात्मना स्वर्णराशिं निधिरखिलगुणानाममुत्तरत्सोमनाथः ॥

Colophon. इति सप्रक्रियमहासान्धिविग्राहिकठक्कुरश्रीवीरेश्वरात्मजसप्रक्रिय महासान्धि-
विग्राहिकठक्कुरश्रीमच्चण्डेश्वरविरचितविवादरत्नाकरः संपूर्णः ॥ * ॥

विषयः । ऋणादानादिनिगमसंज्ञान्तविचारः ।

Previous notice—C.C. Pt. I. p. 580, Pt. II. p. 137, Pt. III. p. 122. R. M. Pt. V. p. 152. C. M. Vol. I. Pt. VI. p. 21.

A. विवादरत्नाकरः By चण्डेश्वर । Vivādaratnākaraḥ.

Substance:-Character, Maithilī. White paper. Lines 11 on a page. Letters 45 in a line. Folia 33. 12×5 inches. Appearance, old Verse and prose. Incomplete. Incorrect. Date wanting. Place of deposit, Pandit Mm. Rājnāth Miśra, Saurāṭh, Madhubanī P. O., Darbhanga. A treatise on Dharmaśāstra dealing with politics by Caṇḍeśara. Worn-out. Letters affected.

Beginning, End, Colophon, विषय:—Same.

B. विवादरत्नाकरः By चण्डेश्वर । Vivādaratnākaraḥ.

Substance:—Character Maithilī. White paper. Lines 10 on a page. Letters 74 in a line. Folia 51. 13¾×4 inches. Appearance, old. Soiled. Worn-out. Torn. Letters not legible throughout. Incomplete. Correct. Date (? . Prose. Place of deposit Raj Library, Darbhanga. A treatise on Dharmaśāstra dealing specially with judicial matters, by Chandeśvara. The Ms. begins from "चौरान्वेषण" ।

Begnning, End, Colophon, विषय:—Same.

C. विवादरत्नाकरः By चण्डेश्वर । Vivādaratnākaraḥ.

Substance:—Character, Maithilī. White paper. Lines 11 on a page. Letters 52 in a line. Folio 70. 12½×4 inches. Appearance, fairly old. Prose and verse. Incomplete. Incorrect, Date wanting. Place of deposit, Pandit Mukund Singh Jhā, Chanaur, Maṇī āchī P. O., Darbhangā. A treatise on Dharmaśāstra, by Caṇḍeśvara. Torn.

Beginning, End, Colophon, विषय:—Same.

No. 337 विवाहतत्त्वम् । By रघुनन्दन । Vivāhatattvam.

Substance:-Character, Maithilī. Palm leaves. Lines 6 on a page. Letters 80 in a line. Folia 23. 13½×2 inches.

Appearance, old. Prose and verse. Complete. Correct. Date (?) Place of doposit, Raj Library, Darbhanga. Pierced by worms. A treatise on Dharmasāstra, dlealing with Vivāha (marriage ceremony) by Raghunandana. This is one of the 28 Tattvas of Raghunandana.

Beginning. ओं नमः श्रीकृष्णाय ॥

प्रणम्य कमलाकान्तं वागीशंजगतांप्रभुम् ।

उद्वाहकर्मणस्तत्वं वक्ति श्रीरघुनन्दनः ॥

अथोद्वाहनिर्णयः तत्र मनुशातातपौ ।

असपिण्डा तुयामातुरसगोत्रा च या पितुः ।

सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥

दारकर्मणि भार्यात्वनिष्पादके कर्मणि etc. ॥

End. विशेषयति मिताक्षरायां स्मृतिः ।

ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः ।

अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतराः ॥

Colophon. इति वंग (घ?) घटीयश्रीहरिभट्टाचार्यात्मजश्रीरघुनन्दनभट्टाचार्यविरचिते स्मृतितत्वे विवाहतत्वं समाप्तं नमस्तस्यै ॥

विषयः । वैवाहिको विचारः ॥

Previous notice :—C. C. Pt. I. P. 580, Pt. II, P. 137, Pt. III, P. 122. A. C. Pt. I. P. 128.

No. 338 विवाहवादः ॥ Vivāhavādaḥ.

Substance :—Character, Maithilī. Yellow paper. Lines 6 on a page. Letters 90 in a line. Folia 2. 19×3½ inches. Appearance, new. Prose. Complete. Correct. Date (?) Place of deposit, Pandit Dāmodar Jhā, Ṭhārhī. Andhrathārhī P. O., Darbhanga.

Beginning. ओं नमोगणेशाय ॥

अथ चरमसंस्कारानुव्यापारो विवाहः । अथ चरमत्वं । स्वावच्छेदकशरीरावच्छिन्नस्याधिकरणवृत्तिसंस्कारप्रागभावासमानकालीनत्वं, तेन न नामकरणादावतिव्याप्तिः ॥

End. यद्वा स्वरूपसत्ताविवाहजन्यतारूपविशेषरहितेन विवाहजन्यतावच्छेदकीभूतसंस्कारनिष्ठ

विलक्षणधर्मेण विशेषणत्वेन स्वीकारे व्यावर्त्तकत्वेन इत्यर्थः । ब्रह्माद्यष्टत्यागानन्तर-
तादृशग्रहणमेव विवाह इति तन्न तादृशज्ञानसमर्थबालकादेर्विवाहेऽव्याप्तेः ॥०॥

Coloph›n. इति विवाह वादः समाप्तः ॥ ० ॥ लिखितमिदं श्रीविश्वनाथशर्मणा । नवद्वी-
पाख्य नगर्य्याम् ॥ ० ॥ १ ॥ ० ॥ * ॥

विषयः । विवाहत्वपरिष्कारः ॥

Previous notice :—C. C. Pt. III P. 122.

No. 339 विवाहवादरहस्यम् । Vivāhavādarahasyam.

Subs'ance : Character, Maithilī.' White paper. Lines 12 on a page. Letters 57 in a line. Fclio 1. 10×3 inches. Appearance, fairly old. Complete. Prose. Correct. Datc (?) Place of deposit, Pandit Śrikānt Miś.a. Salampur, Ghaṭaho P. O., Darbhanga District. A booklet on marriage.

Beginning. ओं नमः ॥ अथ चरमसंस्कारानुकूलव्यापारो विवाहः ॥ अत्रचरमत्वं स्वावच्छेद-
कशरीरावच्छिन्नस्वाधिकरणवृत्तिसंस्कारप्रागभावासमानकालीनत्वं तेन न नाम
करणादावतिप्रसंगः ॥ etc ॥

End. न चैतस्य स्वत्वघटितत्वानुगम तादृशसामानाधिकरण्यकालिकविशेषणोभयसम्बन्धेन
तादृशप्रागभाववदन्यत्वस्य विवक्षणात्मकाप्यनुपपत्तिः ॥ ७ ॥
श्रीगणेश ॥ विवाहवादरहस्यं समाप्तम् ॥ ० ॥

विषयः । वैवाहिकोविचारः ॥

No. 340 विष्णुपूजाकल्पलता By भैरवसिंह ॥ Vishṇupūjākalpalatā.

Substance :—Character Maithi.i. Palm leaves. Lines 6 on a page. Letters 70 in a line. Folia 80. 15×1½ inches Appearance old. Worn out. Torn. Incomplete. Correct generally. Date (?) Place of deposit, Pandit Phuddi Jhā. Avāma, Jhañjhārpur P. O., Darbhanga.

Beginning. ओं नमः श्रीकृष्णाय ॥
श्रीरस्तु वस्तुहिनरश्मिभृतः प्रसादा-
देकं वपुः श्रितवतो हरिणामवेत्य (भवस्य ?) ।
तन्नाभिपङ्कजसहोत्थमुदा (या ?) ललीला-
माविष्करोति यदि यस्य भुजंगराजः ॥

...भूमिमण्डलमहाराजाधिराजो महा

सामन्ताधिपमौलिरत्ननिकरप्रत्यर्चिताङ्घ्रिद्वयः ।

दृप्यद्दुर्धरवैरिदर्पदलनोऽभूद्दर्पनारायणो ।

विख्यातो नरसिंहदेवनृपतिः सर्वार्थचिन्तामणिः ।

विश्वख्यातनयस्तदीयतनयः प्रौढप्रतापोदयः

संग्रामांगणलब्धवैरिविजयः कीर्त्यामलोकत्रयः

मर्यादानिलयः प्रकामविनयः प्रज्ञाप्रकर्षो...(उज्वलः ?)

श्रीमद्भूपतिधीरसिंहविजयी राजत्यसोप्रक्रियः ॥

श्रीमद्भूपतिधीरसिंहसदृशो दृष्टो न दातापरः

शूरो वा न च कोपि यस्य तपनप्रौढप्रतापद्युतेः ।

क......प्रच्युतमार्गगोर (पुनशो ?) स्वयं विलंक्रोगतः ॥

दाने कल्पतरु र्नये सुरगुरुः स्थैर्येसुमेरुस्सता-

माधारो विनयेन लक्ष्मण इव श्रीरामचन्द्रस्य......विधकूलंकषः ।

सश्रीभैरवसिंहदेवनृपतिर्जागर्त्ति तस्यानुजः ॥

सम्यक् पालक एष मैथिलभुवो धत्तेस्वमित्रोत्सवं

शक्त्या वैरिबलं निहन्ति भवतिश्लाघ्यो य...

श्रीमद्भैरवभूपतिः सुमनसामेकोस्ति निर्णीयते ॥

End. श्रीमद्भैरवसिंहस्य तिरभुक्तिमहीभृतः ।

भूयात्फलवती विष्णुपूज कल्पलता कृतिः ॥

Colophon. इतिसमस्तप्रक्रियाविराजमानमहाराजाधिराजनरसिंहदेवात्मजसमस्तप्रक्रियोपेतमहा-

राजाधिराजश्रीमद्धृद्यनारायणानुजसमस्तप्रक्रियालंकृतमहाराजाधिराजहरिनारायण-

रायणरूपनारायणश्रीमद्भैरवसिंहदेवकृतौश्रीविष्णुपूजाकल्पलतापरिपूर्णा ॥

॥ ओं नमः श्रीकृष्णाय ॥ ओं नमो रमोनारसिंभ्याम् ॥ ओं नमः श्रीसूर्याय ॥

विषयः । श्रीविष्णोराराधनप्रकारः सप्रपञ्चः प्रपञ्चितः ॥

Previous notice :—H. S. Vol. II of 1915, pp. 87 and 116.

No. 341 विष्णुप्रतिष्ठा । Visnupratistha.

Substance :—Character, Maithili Brown paper. Lines 7 on a page. Letters 46 in a line. Fola 34. 14 x 3 inches. Appearance, old. Verse and Prose. Complete. Not correct. Date stated, 1740. Worn out. Letters affected. Place of

deposit, Pandit Harṣa Datta Jhā, Yan, Jhañjharpur P. O, Darbhanga. A Ms. of Viṣṇupratiṣṭhāvidhi.

Beginning. ओं नमोगणेशाय: a

ओं नमः श्रीकृष्णाय ॥ नानापुराणान्यवलोकनप्रयोक्तृणांसुखवोध्यायविष्णुप्रतिष्ठाविधि-स्तावदस्माभिरिहसंदर्श्यते ॥ तत्रप्रथमंप्रतिष्ठायांप्रवर्त्तकं पद्मपुराणीयप्रतिष्ठामहात्म्य-मुपतिन्नध्नाति ॥ नारद उवाच ॥

प्रतिष्ठाप्यइरेर्च्चाकियत्फलमाप्नुयात्

प्रसादेनचयत्पुण्यं कथयस्वपितामह ॥

End ओमधकृतेतत्प्रासादसहितविष्णुप्रतिष्ठा कर्मप्रतिष्ठार्थममुंसुवर्णभाग्निदैवतंयथानामगो-त्रायब्राह्मणाय दक्षिणामहंददे । ततः भूर्यदक्षिणा । ततो ब्राह्मणान्भोजयेत् ॥

Colophon. इति श्रीविष्णुप्रतिष्ठापद्धतिः । शाके १७४० आषाढ़शुक्लप्रतिपतिथौ श्रीश्याम-प्रसिद्धदानपतिरलिखत् । शुभमस्तु श्रीरस्तु ॥ पुस्त लिखनपरीश्रमवेता वेद्धज्जनो-नान्यः । सागरलंकनखेदं दशमानकेः परवेद ॥०॥०॥००॥

विषयः । विष्णुप्रतिमाप्रतिष्ठापद्धतिः ॥

No. 341 (A). विष्णुप्रतिष्ठा ॥ Viṣṇupratiṣṭhā.

Substance :—Character Maithilī. White paper. Lines 6 on a page. Letters 36 in a line. Folia 41. 13×4 inches. Appearance, new. Prose. Complete. Incorrect. Date (?) Place of deposit, Pandit Gaṅgā Nāth Miśra, Pāhītol, Maṇi-gāchī P. O., Darbhanga.

Beginning. ओंनमोभगवतेवासुदेवाय ॥ नानापुराणान्यवलोक्य प्रयोक्तृणां सुखवोधाय विष्णुप्रतिष्ठाविधि स्तावदस्माभिरिहसंदर्श्यते ।

End. इत्याचार्यो भूरिदक्षिणा मुनासृजेत् । ततोब्राह्मणान् भोजयित्वा स्वयंभुञ्ज ॥

Colophon. इति विष्णुप्रतिष्ठाविधिः समाप्तः ॥०॥०॥०॥०॥०॥०॥

विषय । विष्णुप्रतिष्ठापद्धति ॥

No. 342 विष्णुप्रतिष्ठा । Viṣṇupratiṣṭhā

Substance :—Character Maithilī. Nepali paper. Lines 7 on a page. Letters 32 in a line. Folia 33. $11\frac{1}{2} \times 4$ inches.

Appearance, old. Prose. Complete. Incorrect. Date Śāka 1769. Place of deposit, Pandit Rāghava Jhā, Andaulī. Mādhavapur P. O., Darbhanga.

Beginning. ओं नमो भगवते वासुदेवाय ।

अथ प्रकारान्तरेण विष्णुप्रतिष्ठाविधि लिख्यते ॥ तत्रपूर्वदिने कृतनियमः प्रतिष्ठादिने प्रातःस्नातः कृतनित्यक्रियो यजमानः प्राङ्मुख उपविष्ट आचान्तः कुशादिक-मादाय etc. ॥

End. ततोगीतनृत्यादिकं श्रीपरमेश्वरसन्तोषायं कारयेत् । ततो यथाशक्तिब्राह्मणान् भोजयेत् । तत्र सञ्चिद्ब्राह्मणम्भागवतः पूजायं नियुज्यात ॥*॥

Colophon. इति विष्णुप्रतिष्ठाविधिपद्धतिः समाप्त ॥ * ॥ शुभशाके १७६९ सन् १२५५ साल फाल्गुने मास्यसितेपक्षे एकादश्यां गुरौवारे । आलिखिता श्रीश्रीकृष्ण-प्रतिष्ठापद्धतिः शुभा ॥ ॐ नमो महागणेशाय ॥ श्रीराम ॥

विषयः । विष्णुप्रतिमास्थापनविधिः ।

No. 343 विष्णुप्रतिष्ठा । Viṣṇupratiṣṭhā.

Substance :—Character, Maithilī. White paper. Lines 9 on a page. Letters 65 in a line. Folia 18. 14×4½ inches. Appearance, fresh. Prose. Complete. Not correct. Date (?) Place of deposit, Pandit Umādatt Miśra, Salampur. Ghaṭāho P. O., Darbhanga. A hand book of Karmakāṇḍa dealing with Viṣṇupratiṣṭhā.

Beginning. श्रीगणेशाय नमः ।

विलोक्यश्रीरिशामरेशशिष्य
गणेश.भिमादिकृतप्रबन्धान् ।
विश्वोपकृत्यै लिखति प्रशस्तां
विष्णुप्रतिष्ठाविधिपद्धतिं सः ॥

तत्र प्रथमेप्रतिष्ठायां प्रवर्तकंपद्मपुराणीयप्रतिष्ठामाहात्म्यमुपनिबध्नाति ।

End. ततो गीतनृत्यादिकं श्रीपरमेश्वरसन्तोषार्थङ्कारयेत् । ततो यथाशक्ति ब्राह्मणान्-भोजयेत् । ततः किञ्चिद्ब्राह्मणं भगवतः पूजायं नियुञ्ज्यात् ॥ * ॥

Colophon. इति विष्णुप्रतिष्ठाविधिपद्धतिः समाप्ता ॥ * ॥

विषयः । विष्णुप्रतिमाप्रतिष्ठापद्धतिः ।

Previous notice :—C. C. pt. I, p. 591.

No. 344 वृद्धशातातपस्मृतिः । Vṛiddhaśātātapasmṛtiḥ.

Substance :—Character, Maithili. Brown paper. Lines 7 on a page. Letters 48 in a line. Folia 2. 14×2 inches. Appearance, fairly old. Verse. Complete. Not correct. Date (?) Place of deposit, Raj Library, Darbhanga. A manual of Dharmaśāstra by Vṛiddhaśātātapa.

Beginning. ओं नमः शिवाय ॥

वृद्धशातातपप्रोक्तं स्मृतितत्त्वविनिश्चयम् ।

संक्षेपेण प्रवक्ष्यामि यावदर्थोपलब्धये ॥

नदीतीरेषु गोष्ठेषु पुण्येष्वायतनेषु च ।

तत्र गत्वा शुचौ देशे ब्रह्मकूर्चं समाचरेत् ॥

End. अकार्यमद्य कुर्वन्ति पूर्वाह्णे चापराह्णिकम् ।

न हि प्रतीक्षते मृत्युः कृतं वास्य नवा कृतम् ॥

यः स्त्रीणां न त्यजेद्रागैरुत्तरोत्तरलोलुभिः ।

पुरोदीर्घापदन्यासैश्छाया सायन्तनीमिव ॥

स्वच्छन्दवनजातेन शाकेनापि प्रमुच्यते ।

इति बुध्वास मस्वार्थः कः कुर्यादसमंजसम् ॥ ६७ ॥

Colophon. इति वृद्धशातातपस्मृतिः समाप्ता ॥ * ॥ श्रीकृष्णाय नमः ॥*॥ श्रीराम ॥श्रीः॥

विषयः । प्रायश्चित्तादयः ।

Previous notice :—C. C. Pt. I. p. 640. Pt. II, p. 152. R. M, Pt. 8 p. 25, C. M. Vol. I, Pt. V, p. 187.

No. 345 वृषोत्सर्गतत्त्वम् By रघुनन्दन भट्टाचार्य्य । Vṛṣotsargatattvam.

Substance :—Character, Maithili. Palm leaves. Lines 5 on a page. Letters 80 in a line. Folia 12. 15×2 inches. Appearance, old. Prose. Worn-out. Worm-eaten and pierced everywhere. Complete. Generally correct. Date, Śāka 1609. Place of deposit, Raj Library, Darbhanga. A hand-book of Chhāndogya Śrāddha by Raghunandana Bhaṭṭāchārya.

Beginning. ॐ नमो नीलरोचिषे ।

प्रणम्य सच्चिदानन्दं वक्ति श्रीरघुनन्दनः ।

छन्दोगानां वृषोत्सर्गे प्रयोगं विदुषां मुदे ॥

अथ छन्दोगानां वृषोत्सर्गप्रयोगः ।

गोशालायां पुण्यभूमौ वा प्रागुदकप्रवर्णदेशं गोमयोदकेनोपलिप्य द्रव्याण्यासादयेत् ॥

End. प्रीयतां पुण्डरीकाक्षः सर्वयज्ञेश्वरो हरिः ।

तस्मिंस्तुष्टेजगन्तुष्टं प्रीणिते प्रीणितं जगत् ॥

इतिमत्स्यपुराणोक्तं पठेत् ।

तएनोदशान्यूनेभ्यो ब्राह्मणेभ्योभोज्यादिमात् ॥

Colophon. इति रघुनन्दनभट्टाचार्यविरचितं छन्दोगवृषोत्सर्गतत्वं संपूर्णम् ।

तद्विष्णोरीतिमन्त्रेण मज्जेदप्सु पुनः पुनः ।

गायत्री वैष्णवीह्येषा विष्णोः संस्मरणाय वै ॥

॥ इति याज्ञवल्क्यः ॥ शाके नवव्योमरसेन्दुयुक्ते ॥

विषय । छन्दोगश्राद्धपद्धतिः ।

Previous notice :—C. C. Pt. I, p. 599. Pt. II, pp. 143, 226. Pt. III, p. 126. A. C. Pt. I, p. 136.

No 346 वृषोत्सर्गप्रयोगतत्वम् By रघुनन्दन॥ Vrcsatsargaprayogatattvam.

Substance: Character, Bengali. White paper. Lines 7 on a page. Letters 30 in a line. Folia 27. 9¾ × 4 inches. Appearance, old. Prose. Complete. Incorrect. Date wanting. Place of deposit, Pandit Damodar Jhā Sāhapur, Pandaul, P. O., Darbhanga. A part of Smṛtitattva of Raghunandana, dealing with Bṛsotsarga of Yajurvedic Brāhmaṇas. Worn-out. Torn.

Begnning. हरिः ।

प्रणम्य सच्चिदानन्दं यज्ञरूपिणमीश्वरम् ।

यजुर्वेदिवृषोत्सर्गं वक्ति श्रीरघुनन्दनः ॥

तत्रागोपष्ठे गोशालायां वितानयुक्तायां वा भूमौ प्रागुदक्प्लवनीदेशं गोमयोदकेनोपलिप्य कृतनित्यक्रियश्चाचान्तः प्राङ्मुख ओन्तत्सदित्युच्चार्य ओं तद्विष्णोरित्युच्चार्य्य स्वस्तिवाचनपूर्वकं कुशतिलजलान्यादाय मुख्यचान्द्रमासोल्लेखः कार्य्यः ॥ मुख्यो-शब्दस्वरस इतिन्यायात ॥

End. ततः प्रीयतां पुण्डरीकाक्षः सर्वयज्ञेश्वरो हरिः ।

तस्मिंस्तुष्टे जगत् तुष्टं प्रीणिते प्रीणितं जगत् ॥

इति मत्स्यपुराणोक्तं पठेत् ।

ततो दशान्यूनब्राह्मणेभ्यो भोज्यानि दद्यात् ॥ * ॥

Colophon. इति श्रीरघुनन्दनभट्टाचार्यविरचितस्मृतितत्वे सागमवृषोत्सर्गप्रयोगतत्त्वं समाप्तम् ॥ ॥

विषय । यजुर्वेदिनां वृषोत्सर्गश्राद्धपद्धतिः ।

No. 347 **वृषोत्सर्गाधिकारितानिर्णयः** By **विश्वनाथझा ।**

Vṛṣotsargādhikāritānirṇayaḥ.

Substance :—Character, Maithilī. White paper. Lines 9 on a page. Letters 64 in a line. Folia 15. 14½ × 4½ inches. Appearance, old. Prose. Complete. Generally correct. Date (?) Place of deposit, Pandit Dāmodar Jhā, Ṭhārhī, Andhraṭhārhī P. O., Darbhanga. Worn-out.

Beginning. ॐ श्रीगणेशं शिवं दुर्गां सीतां जनकनन्दिनीम् ।

प्रणम्य शिरसा भूयो विश्वनाथो द्विजोत्तमः ।

करोति धर्मरक्षार्थं धर्मशास्त्रविवेचनम् ॥

End. विष्ठितस्य तथा यत्नात् कृष्णसारस्य चर्म्मणा ।

उर्णासूत्रेण बध्नातु प्रलेपस्तु तथा यवैः ॥

ऊर्ध्वोः जंघयोः कम्बलसूत्रेण वेष्टनं मार्ग्यम् ।

Colophon. नास्ति ॥

विषयः । वृषोत्सर्गश्राद्धविचारः ॥

No. 348 **वेदाधिकारितानिर्णयः** By **विश्वनाथझा ।** Vedādhikāritānirṇayaḥ.

Substance :—Character, Maithilī. White paper. Lines 8-10 on a page. Letters 71 in a line. Folia 8. 14 × 4½ inches. Appearance, new. Prose and verse. Complete. Correct. Date (?) Place of deposit, Pandit Dāmodar Jhā, Ṭhārhī, Andhraṭhārhī. P. O., Darbhanga.

Begnning. ॐ सीतां सृष्टिकरीन्देवीं रामचन्द्रविलासिनीम् ।

नमामि शतशो नित्यं धर्मकामार्थमुक्तिदाम् ॥

तारापतिसुतो धीमान् विश्वनाथाख्यमैथिलः ।

सोदरपुरकुले जातो न्यायशास्त्रस्य पारगः ॥
वेदान्ततन्त्रसिद्धान्तं विविच्य बहुभिर्द्विजैः ।
साङ्ख्यं योगं तथा न्यायमवलोक्य मुदान्वितः ॥
